श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीकमलाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकमलाष्टकम् ॥

न्यङ्कावरातिभयशङ्काकुले धृतदृगङ्कायतिः प्रणमतां
शङ्काकलङ्कयुतपङ्कायताश्मशितटङ्कायितस्वचरिता।
त्वं कालदेशपदशङ्कातिपातिपतिसङ्काशवैभवयुता
शं काममातरनिशं कामनीयमिह सङ्काशयाशु कृपया॥ १॥

आचान्तरङ्गदलिमोचान्तरङ्गरुचिवाचां तरङ्गगतिभिः
काचाटनाय कटुवाचाटभावयुतनीचाटनं न कलये।
वाचामगोचरसदाचारसूरिजनताचातुरीविवृतये
प्राचां गतिं कुशलवाचां जगज्जननि याचामि देवि भवतीम्॥ २॥

चेटीकृतामरवधूटीकराग्रधृतपेटीपुटार्घ्यसुमनो-
वीटीदलक्रमुकपाटीरपङ्कनवशाटीकृताङ्गरचना।
खेटीकमानशतकोटीकराब्जजजटाटीरवन्दितपदा
या टीकतेऽब्जवनमाटीकतां हृदयवाटीमतीव कमला॥ ३॥

स्वान्तान्तरालकृतकान्तागमान्तशतशान्तान्तराघनिकराः
शान्तार्थकान्तवकृतान्ता भजन्ति हृदि दान्ता दुरन्ततपसा।
यां तानतापभवतान्तातिभीतजगतां तापनोदनपटुं
मां तारयत्वशुभकान्तारतोऽद्य हरिकान्ताकटाक्षलहरी॥ ४॥

यां भावुका मनसि संभावयन्ति भवसंभावनापहृतये
त्वं भासि लक्ष्मि सततं भाव्ययद्भवनसंभावनादिविधये।
जम्भारिसंपदुपलम्भादिकारणमहं भाव्यमङ्घ्रियुगलं
संभावये श्रुतिषु संभाषितं वचसि संभाष्य तस्य तव च॥ ५॥

दूरावधूतमधुधारागिरोच्चकुचभारानताङ्गलतिका-
साराङ्गलिप्तघनसारार्द्रकुङ्कुमरसा राजहंसगमना।

www.prapatti.com

वैराकरस्मरविकारापसंसरणवाराशिमग्नमनसः
श्रीराविरस्तु धुरि ताराय मे गुरुभिराराधिता भगवती॥ ६॥

श्रीवासधूपकनदावासदीपरुचिरावासभूपरिसरा
श्रीवासदेशलसदावापकाशरदभावाभकेशनिकरा।
श्रीवासुदेवरमणी वामदेवविधिदेवाधिपावनपरा
श्रीवासवस्तुनरदेवादृतस्तुतिसभावा मुदेऽस्तु सुतराम्॥ ७॥

भाषादिदेवकुलयोषामणिस्तवनघोषाञ्चितस्वसविधा
दोषाकुले जगति पोषाकुला सपदि शेषाहिशायिदयिता।
दोषालयस्य मम दोषानपोह्य गतदोषाभिनन्द्यमहिमा
शेषाशनाहिरिपुशेषादिसंपदविशेषान् ददातु विभवान्॥ ८॥

॥ इति श्रीकमलाष्टकम् समाप्तम्॥

www.prapatti.com